①

# छत्तीसगढ़ माध्यमिक शिक्षा मंडल, रायपुर

## हायर सेकेण्डरी सर्टिफिकेट परीक्षा वर्ष 2008–09

## मॉडल प्रश्न पत्र

| | | | |
|---|---|---|---|
| कक्षाः– | 12 वीं | विषयः– | संस्कृत (विशिष्ट) (मानविकी समूहः) |
| समयः– | 3 घण्टे | पूर्णांकः– | 100 |

---

निर्देशः – सर्वेषाम् प्रश्नानां सामाधानं कुरूत –

प्रश्न 1– निम्नाङ्किकतेषु शब्देषु द्वयोः शब्दयोः संधि विच्छेदं कृत्वा नामानि लिखत – (2)

1. उद्धरणम् 2. वागीशः
3. वायुश्चलति 4. पुनरपि

प्रश्न 2– संधि–कृत्वा द्वयोः शब्दयोः नामानि लिखत – (2)

1. निः+जन 2. सम्+कृतः
3. सः+गच्छति 4. तरू+छाया

प्रश्न 3– द्वयोः शब्दयोः निर्देशानुसार त्रिषु वचनेषु कारक रचनाः लिखत – (2)

1. महत् (द्वितीया) 2. अस्मद् (चतुर्थी) किम् (पु.) सप्तमी

प्रश्न 4– त्रणायाम् शब्दानां विभक्ति–वचनानि लिखत – (2)

1. अक्षिणी 2. तस्मात् 3. एकेन

प्रश्न 5– द्वयोंः शब्दयोः धातुरूपान् त्रिषु वचनेषु लिखत – (2)

1. दा (लोटलकार) अ.पु.
2. कृ (लृटलकार) म.पु.
3. ज्ञा (वि.लि.) उ.पु.

प्रश्न 6– द्वयोः शब्दयोः वचन–लकार–पुरूषान् लिखत – (2)

1. तनुथ 2. कुर्यात् 3. आप्नुवन्तु

प्रश्न 7– द्वयोः शब्दयोः समास विग्रहं कृत्वा नामानि लिखत – (2)

1. उपराजम् 2. प्राप्तोदकः 3. हरिहरौ

प्रश्न 8– द्वयोः शब्दयोः सामासिक–शब्दं लिखित्वा नामानि लिखित – (2)

1. नीलम् उत्पलम् 2. प्रगतः आचार्यः 3. यूपायदारू

प्रश्न 9– द्वयोः वाक्ययोः वाच्य–परिवर्तनं कृत्वा लिखत – (2)

1. बालकः ग्रंथं पठति ।
2. तेन गम्यते ।
3. बालकैः वृक्षाः दृश्यन्ते ।

प्रश्न 10– एकस्य अलंकारस्य लक्षणम् सोदाहरणं लिखत – (3)

1. रूपकः 2. विभावना ।

प्रश्न 11– सलक्षणम् अलंकारस्य नाम लिखत – (2)

लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नमः
असत्पुरूषसेवेव दृष्टिफलतां गता ।।

प्रश्न 12– एकस्य छंदस्य सोदाहरणं लक्षणम् लिखित – (3)

1. अनुष्टुप् 2. वंशस्थ

प्रश्न 13– सलक्षणम् छंदस्य नाम लिखत – (2)

त्वमेव माता च पिता त्वमेव ।
त्वमेव बन्धु च सखा त्वमेव ।।
त्वमेव विद्या द्रविणं त्वमेव ।
त्वमेव सर्वं मम देवदेवः ।।

प्रश्न 14– वेदांग किसे कहते हैं ? इसके भेद बताइये । (4)

प्रश्न 15– वैदिक एवं लौकिक संस्कृत में अंतर लिखिये । (4)

या

उत्तररामचरित पर टिप्पणी लिखिये ।

प्रश्न 16– सामवेद अथवा अर्थवेद पर टिप्पणी लिखिए । (4)

प्रश्न 17– अभिज्ञानशाकुन्तल पर संक्षिप्त टिप्पणी लिखिये – (4)

या

शूद्रक के मृच्छकटिक का परिचय दीजिए ।

प्रश्न 18– गद्यांशानाम् हिन्दी रूपान्तरणं कुरूत – (9)

अ. पुत्र! धरती केवलं भूमि–भागं नास्ति । अयं तु अस्माकं जननी । '' जननी जन्मभूमिश्च स्वर्गादपि गरीयसी'' इति वेदाः कथयन्ति । अस्तु पाद् स्पर्शनात् पूर्वं वन्दना आवश्यकी । धरती जननीवत् अस्मान् पालयति रक्षति, वर्धयति च । अतः ''पादस्पर्शनं क्षमस्व मे इति प्रार्थयित्वा एव पादस्पर्शं कर्तव्यम् ।'' माता भूमिःपुत्रोऽहं पृथिव्याः ।

ब. कस्मिंश्चिदधिष्ठाने चत्वारो ब्राह्मण–पुत्राः परस्परं मित्रभावमुपगता वसन्तिस्म । तेषां त्रयः शास्त्र पारङ्गताः परन्तु बुद्धिरहिताः । एकस्तु बुद्धिमान् केवलं शास्त्र पारड.ताः । अथ तैः कदाचिंमत्रितम् – को गुणो विद्याया, येन देशान्तरं गत्वा भूपतीन् परितोस्यार्थोपार्जनं न क्रियते । तत्पूर्ण देशं गच्छामः तथानुष्ठिते किंचिनमार्गं गत्वा तेषां ज्येष्ठतरः प्राह अस्माकमेकः चतुर्थो मूढः केवलं बुद्धिमान् ।

स. भारते पठनपाठन व्यवस्था प्राचीनकालादेव प्रचलिता । पुरा श्रृतिपरम्परया एवं शिक्षा प्रचलिताऽसीत् । तदा सुयोग्य उपाध्याय आचार्यश्च सुयोग्यान् शिशिक्षून् शिक्षयन्ति स्म । प्राचीनकाले शिक्षायाः साफल्यस्य अयमेव हेतुरासीत् । शिक्षायाः साफल्यं वर्णयता तत्रभवता कविकुलगुरूणा कालिदासेन स्वस्नाथी कृते ''मालविकाग्नि मित्रम् नाम्नि रूपके सुयोग्य शिष्यां मालविकां प्रशसतः गणदासस्य मुखेनोक्तं यत् यथा पयोदस्य जलं समुद्रशुक्तौ न्यस्तं मुक्ताफलतां ब्रजति तथैव उपदेष्टुः विशिष्टपात्रे न्यस्तं शिल्पं गुणविशेषं गच्छति ।''

प्रश्न 19– निम्नलिखितान् श्लोकानाम् हिन्दी अर्थः लिखित – (9)

(अ) शैले–शैले न माणिम्यं भौक्तिकं न गजे गजे ।
साधका नहि सर्वत्र, चन्दनं न बने बने ।।

(ब) धनधान्यप्रयोगेषु विद्यासड.हणेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ।।

(स) दानेन लम्यते स्वर्गः श्रीदानेनैव लभ्यते ।
दानेन शत्रुंजयति, व्याधिर्दानेन नश्यति ।।

अथवा

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यसमो बंधुः कृत्वा यं नावसीदति ।।

प्रश्न 20– देववाण्याम् उत्तराणि लिखत – (5)

1. वनचरः किमर्थं नियुक्तः युधिष्ठिरेण ?

2. सुपुत्रः कस्य दीपकः ?

3. सुखं कः प्राप्नोति ?

4. अति कुत्र वर्जयेत् ?

5. कराग्रे कः वसति ?

6. जनप्रियसिंहः कः आसीत् ।

प्रश्न 21– पंचप्रश्नानाम् हिन्दी भाषायाम् उत्तराणि लिखत – (5)

1. अनागतविधाता किं करोति ?

2. बेतालः राजानं किमब्रवीत् ?

3. रत्ना राजपथ विषये किम् कथयति ?

4. पुरूषं केयूराः किम् कुर्वन्ति ?

5. सिंहेन श्रृगालशिशुः किमर्थ न व्यापादितः ?

6. गो मूत्रस्य को प्रभावः ?

प्रश्न 22– ''सिंह कारकाणां त्रयाणां कथा'' का सारांश लिखिये ? (4)

प्रश्न 23– दो सुभाषित श्लोक लिखिये जो प्रश्न पत्र में न आया हो । (5)

प्रश्न 24–

1. अगन्तुं सतांवर्त्म .................... नावसीदति ।
2. श्रियः .................... बनेचरः ।
3. आहारे .................. सुखी भवेत् ।
4. अथप्रजानां ............... मुमोच ।

प्रश्न 25– एकस्य विषयोपरि संस्कृत भाषायाम् निबंधरचनाम् लिखत । (8)

प्रश्न 26– स्थानान्तरण प्रमाण पत्रं प्राप्तुम् स्वप्राचार्यम् संस्कृत भाषायामेकमावेदनं पत्रं लिखत – (4)

प्रश्न 27– अधोलिखित अपठित गद्यांशम् पठत् हिन्दी भाषायाम् च अनुवादं कृत्वा प्रश्नानां संस्कृत भाषायाम् उत्तराणि शीर्षकम् च लिखत –

संस्कृत भाषा देवभाषा प्रायेण सर्वासां भारतीय भाषाणां जननी प्रादेशिक भाषाणां प्राणभूता इति । यथा प्राणी अन्नेन जीवति परं वायुं बिना अन्नमपि जीवनं रक्षितुं न शक्नोति तथैव अस्मद्देशस्य कापि भाषा संस्कृत भाषा वलम्बं विना जीवितुमक्षमेंति निःसंशया अस्यामेव अस्माकं धर्मः अस्माकं भूत भविष्यंच सर्व सुसन्निहितम् अस्ति ।

प्रश्न 1– उपरिलिखितस्य गद्यांशस्य शीर्षक लिखत ।

प्रश्न 2– अस्माकं किं किं सस्कृतभाषायाम् सुसन्निहितम् अस्ति ?

प्रश्न 3– अक्षमा इति पदस्य समास नाम लिख्यताम् ।

--------X--------